## प्रकारवचने थाल्। (२३/१९७१)

'किंसर्वनामबहुभ्योऽद्व्यादिभ्यः' (५.३.२/१९४८) इति वर्तते। सप्तम्याः इति काले इति च निवृत्तम्। सामान्यस्य भेदकः विशेषः प्रकारः। प्रकृत्यर्थविशेषणं चैतत्। प्रकारवृत्तिभ्यः किंसर्वनामबहुभ्यः स्वार्थे थाल् प्रत्ययो भवति। तेन प्रकारेण तथा। यथा। सर्वथा[1]। जातीयरोऽपीदृशमेव लक्षणम्। स तु स्वभावात् प्रकारवति वर्तते, थाल् पुनः प्रकारमात्रे॥

## इदमस्थमुः। (२४/१९७२)

इदंशब्दात् प्रकारवचने थमुः प्रत्ययो भवति। थालोऽपवादः। अनेन प्रकारेण इत्थम्। उकारो [2]मकारपरित्राणार्थः॥

## किमश्च। (२५/१९७३)

किंशब्दात् प्रकारवचने[3] थमुः प्रत्ययो भवति[4]। केन प्रकारेण कथम्। योगविभागः उत्तरार्थः॥

## था हेतौ च च्छन्दसि। (२६/३६००)

किंशब्दाद्धेतौ वर्तमानात् था प्रत्ययो भवति, चकारात् प्रकारवचने छन्दसि विषये। हेतौ तावत् – 'कथा ग्रामं न पृच्छसि' (ऋ. १०.१४६.१)। केन हेतुना न पृच्छसि इत्यर्थः। प्रकारवचने – कथा देवा आसन् [5]पुराविदः। विभक्तिसञ्ज्ञायाः पूर्णोऽवधिः॥

## दिक्शब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः। (२७/१९७४)

दिशां[6] शब्दाः दिक्शब्दाः। तेभ्यो [7]दिक्शब्देभ्यो दिग्देशकालेषु वर्तमानेभ्यः सप्तमीपञ्चमीप्रथमान्तेभ्यः अस्तातिः प्रत्ययो भवति स्वार्थे। यथासङ्ख्यमत्र नेष्यते। पुरस्ताद् वसति। पुरस्तादागतः। पुरस्ताद् रमणीयम्। अधस्ताद् वसति। अधस्तादागतः। अधस्ताद् रमणीयम्। दिक्शब्देभ्यः इति किम्? ऐन्द्र्यां दिशि वसति। सप्तमीपञ्चमीप्रथमाभ्यः इति किम्? पूर्वं ग्रामं गतः। दिग्देशकालेषु इति किम्? पूर्वस्मिन् गुरौ वसति। [8]इकारस्तकारपरित्राणार्थः॥

## दक्षिणोत्तराभ्यामतसुच्। (२८/१९७८)

दक्षिणोत्तराभ्यां[9] दिग्देशकालेषु वर्तमानाभ्यां सप्तमीपञ्चमीप्रथमान्ताभ्यां [10]स्वार्थेऽतसुच् प्रत्ययो भवति। अस्तातेरपवादः। दक्षिणाशब्दः काले न सम्भवति इति दिग्देशवृत्तिः [11]परिगृह्यते। दक्षिणतो वसति। दक्षिणत आगतः। दक्षिणतो रमणीयम्। उत्तरतो वसति। उत्तरत आगतः। उत्तरतो रमणीयम्। अकारो विशेषणार्थः 'षष्ठ्यतसर्थप्रत्ययेन' (२.३.३०/६०९) [12]इति॥

---

1. अन्यथा इत्यधिकम् ग. 2. मकारस्य इत्संज्ञापरित्राणार्थः। एतस्मादेव ज्ञापकात् 'न विभक्तौ तुस्माः' इति इह प्रकरणे न प्रवर्तते क. 3. वर्तमानात् स्वार्थे इत्यधिकम् क. 4. थालोऽपवादः इत्यधिकम् व. क. ड. ग. 5. पुराविदः नास्ति फ, पुरा क. ह. 6. वाचकाः इत्यधिकम् ग. फ 7. दिक्शब्देभ्यो नास्ति फ. 8. वाक्यमिदं नास्ति व. फ. 9. शब्दाभ्याम् इत्यधिकम् फ. 10. स्वार्थे नास्ति फ. 11. गृह्यते व. क. 12. इति नास्ति क.